LAGHŪPASARGAVṚTTI

EDITED BY V. KRISHNAMACHARYA

THE *Laghūpasargavṛtti*, which is now being published for the first time, is a small and simple monograph dealing with the Upasarga-s or Prepositions in Sanskrit. These Upasarga-s are twenty in number and each of them has several meanings. The work explains in verse and prose the meaning of the Upasarga-s with suitable illustrations.

Regarding the significance of Upasarga-s there are two views. The grammarians hold the view that Upasarga-s have no meaning in themselves; but they simply reveal the hidden meaning of the roots to which they are prefixed. On the other hand, the Naiyāyika-s hold the view that like other words, the Upasarga-s too have their own meaning and by virtue of their expressive power the original meaning of the roots is changed. The author of the work belongs to the former school.

The name of the author is not known. As the work is found in the midst of some Jaina works in the codex, he may be inferred to have belonged to the Jaina faith. The work is written on the model of Kṣīrasvāmin's *Nipātāvyayopasargavṛtti*, published in the Sri Venkateswara Oriental Series, Tirupati, and is different from the Upasarga portion of that edition.

This edition is based on a unique MS. (No. TR 443) in the Adyar Library. Another MS. of this work is in the Asiatic Society of Bengal, Calcutta, described under No. 4606 of vol. 6 of their Descriptive Catalogue. Other MSS. entitled *Upasargavṛtti*, *Laghūpasargavṛtti* and *Laghūpasargadīpikā*, evidently identical with the present text, are in the Oriental Institute, Baroda, the Kerala University, Trivandrum, and the Punjab University collection.

लघूपसर्गवृत्तिः

प्रपरापसमन्ववनिर्दुरभि-
व्यधिसूदतिनिप्रतिपर्यपयः ।
उप आङिति विंशतिरेष सखे
उपसर्गगणः कथितः कविभिः ॥ १ ॥

अयमुपसर्गगणः प्राचीनैः कविभिरुक्तो विंशतिसंख्याकः ॥ १ ॥

नियोगे वियोगे भृशार्थे च तृप्तौ
तथा शुद्धिशक्त्यग्रपूजासु शान्तौ ।
वदन्त्यादिकर्मण्युदीर्णे प्र सन्त-
स्तथा संभवैश्वर्यदृष्टाभिलाषे ॥ २ ॥

प्र इत्ययमुपसर्गः पञ्चदशस्वर्थेषु प्रवर्तते । **नियोगे**; प्रयुक्तः । **वियोगे**; प्रोषितः । **भृशार्थे**; प्रवदन्ति दायादाः । **तृप्तौ**; प्रभुक्तमन्नम् । **शुद्धौ**; प्रसन्नमुदकम् । **शक्तौ**; प्रसक्तो विद्यायाम् । **अग्रे**; प्रवालो वृक्षः ।

पूजायाम्; प्राञ्जलिः स्थितः । **शान्तौ**; प्रशान्तो वह्निः । **आदिकर्मणि**; प्रयातः । **उदीर्णे**; प्रबलो राजा । **संभवे**; हिमवतो गङ्गा प्रवहति । **ऐश्वर्ये**; प्रभुर्देवदत्तः । **दृष्टे**; प्रलोकयति । **अभिलाषे**; प्रार्थयते कन्याम् ॥ २ ॥

परा वधे गतौ धर्षेऽनाभिमुख्यभृशार्थयोः ।
अप्राधान्ये विमोक्षे स्याद्विक्रमप्रातिलोम्ययोः ॥ ३ ॥

परा इत्ययमुपसर्गः नवस्वर्थेषु प्रवर्तते । **वधे**; पराहतः । **गतौ**; पलायते । **धर्षे**; परामृष्टः । **अनाभिमुख्ये**; परावृत्तः । **भृशार्थे**; पराजितः । **अप्राधान्ये**; पराधीनः । **विमोक्षे**; परागतः । **विक्रमे**; पराक्रान्तः । **प्रातिलोम्ये**; पराङ्मुखः ॥ ३ ॥

वियोगे वर्जने चौर्ये हर्षे निर्देशवारणे ।
विपर्ययविकृत्योश्च अप इत्ययमुच्यते ॥ ४ ॥

अप इत्ययमुपसर्गः अष्टस्वर्थेषु वर्तते । **वियोगे**; अपयान्ति । **वर्जने**; अप साकेतात् वृष्टो देवः । **चौर्ये**; अपहरति । **हर्षे**; अपहसति । **निर्देशे**; अपदिशति । **वारणे**; अपसर्पति पापात् । **विपर्यये**; अपशब्दः । **विकृतौ**; अपकृतम् ॥ ४ ॥

सिद्धौ समक्षे प्रभवैक्ययोग-
समन्ततोभावविभूषणेषु ।
श्लेषाभिमुख्ये च वियोगसत्ये
वदन्ति सं स्वीकरणे च कोपे ॥ ५ ॥

सम् । अयमुपसर्गः त्रयोदशस्वर्थेषु प्रोच्यते । **सिद्धौ**; संसिद्धिः । **समक्षे**; संकथा वर्तते । **प्रभवे**; संभवत्यग्निः काष्ठे । **ऐक्ये**; संवदन्ति मुख्याः ।

योगे; संगतः । **समन्ततोभावे**; संकीर्णः । **विभूषणे**; संस्क्रियते कन्या । **श्लेषे**; संधत्ते कार्यम् । **आभिमुख्ये**; संमुखम् । **वियोगे**; संविभक्तः । **सत्ये**; संमतः । **स्वीकरणे**; संगृह्णाति । **कोपे**; संक्रुद्धः ॥ ५ ॥

पश्चाद्भावे लक्षणे चाभिमुख्ये
सामीप्याधिष्ठानसादृश्यहीने ।
स्वाध्यायेऽपि प्रोक्त एवानुबन्धे
पूर्वाचार्यैरन्वयं चाविसर्गे ॥ ६ ॥

अनु । अयमुपसर्गो दशस्वर्थेषु प्रवर्तते । **पश्चाद्भावे**; अनुवनम् । **लक्षणे**; . . . . . . । **आभिमुख्ये**; अनु मातरं धावति । **सामीप्ये**; अनुसायं गमनम् । **अधिष्ठाने**; अनुशोणं पाटलिपुत्रम् । **सादृश्ये**; अनुकृतिः । **हीने**; अन्वर्जुनं योद्धारः । **स्वाध्याये**; अनुवाकमधीते । **अनुबन्धे**; अनुशयः । **अविसर्गे**; अनुक्रान्तो गच्छति ॥ ६ ॥

व्याप्तिशुद्धिवियोगेषु विज्ञाने चावलम्बने ।
बुधैः परिभवे प्रोक्तमीषदर्थेऽप्यव स्फुटम् ॥ ७ ॥

अव । अयमुपसर्गः सप्तस्वर्थेषु प्रवर्तते । **व्याप्तौ**; अवकीर्णः । **शुद्धौ**; अवदातं मुखम् । **वियोगे**; अवमुक्ता कान्ता । **विज्ञाने**; अवगतोऽर्थः । **अवलम्बने**; दण्डमवष्टभ्यास्ते । **परिभवे**; अवहसति । **ईषदर्थे**; अवलम्बनम् ॥ ७ ॥

पापात्ययभृशार्थेषु वियोगादेशयोश्च निर् ।
लाभातिक्रमयोः प्रोक्तः पण्डितैरवधारणे ॥ ८ ॥

निर् । अयमुपसर्गः अष्टस्वर्थेषु प्रवर्तते । **पापे**; निर्मर्यादः । **अत्यये**; निर्मलं सरः । **भृशार्थे**; निर्णीतम् । **वियोगे**; निःशल्यम् । **आदेशे**; निर्दिष्टः । **लाभे**; निर्दिशः (?) । **अतिक्रामे**; निष्क्रान्तः । **अवधारणे**; निश्चितम् ॥ ८ ॥

वैवर्ण्यकुत्सनालाभासंपत्तिषु दुरुच्यते ।
ईषदर्थे कृशे प्रोक्तः पूर्वाचार्यैः कवीश्वरैः ॥ ९ ॥

दुर् । अयमुपसर्गः षट्सु अर्थेषु प्रवर्तते । **वैवर्ण्ये**; दुर्वर्णः । **कुत्सने**; दुष्पुरुषः । **अलाभे**; दुष्प्रापम् । **असंपत्तौ**; दुर्गतः । **ईषदर्थे**; दुर्गृहीतः । **कृशे**; दुःस्थः ॥ ९ ॥

पूजोक्तीच्छादने नृत्ये सादृश्याम्नाययोरभिः ।
सारूप्याभिमुख्यव्याधौ स्याद्भृशार्थप्रयोगयोः ॥ १० ॥

अभि । अयमुपसर्गः द्वादशस्वर्थेषु प्रयुज्यते । **पूजायाम्**; अभिवादयति । **उक्तौ**; अभिवदनम् । **इच्छायाम्**; अभिलषति । **अदने**; अभ्यवहरति । **नृत्ये**; अभिनयः । **सादृश्ये**; अभिजातः । **आम्नाये**; अभ्यस्यति । **सारूप्ये**; अभिरूपः । **आभिमुख्ये**; अभिमुखः स्थितः । **व्याधौ**; अभिस्यन्दः । **भृशार्थे**; अभिरतः । **प्रयोगे**; अभिजानाति ॥ १० ॥

नानार्थे भयकुत्सने च कलहे दूरार्थपैशुन्ययो-
रैश्वर्यातिशयप्रदर्शनभृशार्थोत्कर्षशौर्येषु च ।
अप्राधान्यवियोगमोहचटुलस्थानेषदर्थे स्फुटं
ह्यस्मिन्नर्थकदम्बकेऽनभिमुखेऽप्युक्तो विराद्यैर्बुधैः ॥११॥

वि । अयमुपसर्गः अष्टादशस्वर्थेषु कथ्यते । **नानार्थे ;** विचित्रा पाणिनेः सूत्राणां गतिः । **भये ;** विपन्नः । **कुत्सने ;** विरूपः । **कलहे ;** विभज्यं धनम् । **दूरार्थे ;** विसृष्टमध्वानम् । **पैशुन्ये ;** विकरोति । **ऐश्वर्ये ;** विभुर्देवदत्तः । **अतिशये ;** विकीर्णः । **प्रदर्शने ;** विलोकनीया कन्या । **भृशार्थे ;** विशुद्धा नद्यः । **उत्कर्षे ;** विस्मितो जनः । **शौर्ये ;** विक्रान्तः । **अप्राधान्ये ;** विनष्टः । **वियोगे ;** विमुक्तः । **मोहे ;** विमनस्कः । **चटुलस्थाने ;** विभ्रान्तः । **ईषदर्थे ;** विलगितः । **अनाभिमुख्ये ;** विमुखः ॥ ११ ॥

आधिक्यस्मरणैश्वर्यवशीकृतिषु वर्तते ।
अधिष्ठानेऽप्यधिः प्रोक्तस्तथा चाध्ययनेऽपि सः ॥ १२ ॥

अधि । अयमुपसर्गः षट्स्वर्थेषु प्रवर्तते । **आधिक्ये ;** अधिराजः । **स्मरणे ;** मन्त्रमधिस्मरति । **ऐश्वर्ये ;** अधिपतिः । **वशीकृतौ ;** अधिकरोति रथी रथम् । **अधिष्ठाने ;** अधिगुणः । **अध्ययने ;** अधीते व्याकरणम् ॥ १२ ॥

पूजायां च समृद्धौ च भृशकृच्छ्रार्थयोरपि ।
उपसर्गविशेषज्ञैः सुः प्रोक्तोऽनुमतावपि ॥ १३ ॥

सु । अयमुपसर्गः पञ्चस्वर्थेषु वर्तते । **पूजायाम् ;** सुब्रह्म । **समृद्धौ ;** सुभद्रम् । **भृशार्थे ;** सुवहा आपः । **कृच्छ्रार्थे ;** सुदुष्करम् । **अनुमतौ ;** सुकृतम् ॥ १३ ॥

प्राबल्यलाभमोक्षोर्ध्वकर्मप्राकाश्यशक्तिषु ।
वियोगाभावबन्धे स्यादुदस्वास्थ्यप्रधानयोः ॥ १४ ॥

उत् । अयमुपसर्गः एकादशस्वर्थेषु वर्तते । **प्राबल्ये;** उद्धलः सर्वः । **लाभे;** उत्पन्नं द्रव्यम् । **मोक्षे;** उद्दामः । **ऊर्ध्वकर्मणि;** आसनादुत्तिष्ठति । **प्राकाश्ये;** उच्चरति । **शक्तौ;** उद्ग्राहः । **वियोगे;** उत्पथेन गच्छति । **अभावे;** उत्पथः । **बन्धे;** उद्बद्धाः कन्याः । **अस्वास्थ्ये;** उत्सुकः । **प्रधाने;** उत्कृष्टः ॥ १४ ॥

भृशार्थेऽतिशयेऽपि स्याद् वृद्ध्यतिक्रान्तयोरपि ।
अत्यतिक्रमणे प्रोक्त उपसर्गविचक्षणैः ॥ १५ ॥

अति । अयमुपसर्गः पञ्चस्वर्थेषु वर्तते । **भृशार्थे;** अतितप्ता आपः । **अतिशये;** अतिमानुषमस्य ज्ञानम् । **वृद्धौ;** अतिमेघं गगनम् । **अतिक्रान्ते;** अतिनु जलम् । **अतिक्रमणे;** अतिहस्तयति ॥ १५ ॥

निवेशे भृशार्थाश्रये दारकर्म-
ण्यधोभावविन्यासकौशल्यमोक्षे ।
समीपे स्मृतो बन्धने राशिदृष्टे
बुधैर्मध्यभावे विरामे निरेषु ॥ १६ ॥

नि । अयमुपसर्गः चतुर्दशस्वर्थेषु वर्तते । **निवेशे;** निविशते । **भृशार्थे;** निगृहीतः । **आश्रये;** निलयः । **दारकर्मणि;** निविष्टो देवदत्तः । **अधोभावे;** निपतितः । **विन्यासे;** निवेशनं गृहस्य । **कौशल्ये;** निपुणः । **मोक्षे;** निसृष्टः । **समीपे;** संनिकृष्टः । **बन्धने** नियमितः । **राशौ;** निकरो धान्यस्य । **दृष्टे;** निशामयति रूपम् । **मध्यभावे;** निपीतमुदकं सिकताभिः । **विरामे;** निवृत्तः पापात् ॥ १६ ॥

सादृश्यादानरुग्घिंसातद्योगे व्याप्तिवारणे ।
निवृत्तिप्रतिबिम्बाभिमुख्ये स्याद् व्यत्यये प्रति ॥ १७ ॥

प्रति । अयमुपसर्गः एकादशस्वर्थेषु प्रयुज्यते । **सादृश्ये;** प्रति देवदत्तस्य । **आदाने;** प्रतिगृह्णाति । **रुजि;** प्रतिश्यायः । **हिंसायाम्;** प्रतिहतः । **तद्योगे;** प्रतिपन्नमेतेन । **व्याप्तौ;** प्रतिकीर्णः पांसुभिः । **वारणे;** प्रतिनिवृत्तः । **निवृत्तौ;** प्रतिक्रान्तः । **प्रतिबिम्बे; . . . .** । **आभि-मुख्ये;** प्रतिसूर्यं गच्छति । **व्यत्यये;** तैलेन घृतं प्रतिददाति ॥ १७ ॥

परि दोषोक्तिविभूषण
उपरमपूजासमन्ततोभावे ।
व्याप्त्यालिङ्गनवर्जन-
निवसनशुग्व्याधिवीप्सासु ॥ १८ ॥

परि । अयमुपसर्गः द्वादशस्वर्थेषु दृश्यते । **दोषोक्तौ;** परिहसति देवदत्तः । **विभूषणे;** परिष्करोति कन्याम् । **उपरमे;** परिपूर्णः कुम्भः । **पूजायाम्;** परिचरति गुरुम् । **समन्ततोभावे;** परिभ्रमति । **व्याप्तौ;** परिगतो वह्निना ग्रामः । **आलिङ्गने;** परिष्वजति कन्याम् । **वर्जने;** परि त्रिगर्तेभ्यो वृष्टो देवः । **निवसने;** परिधानम् । **शुचि;** परिदेवनम् । **व्याधौ;** परिगताः स्फोटकाः । **वीप्सायाम्;** वृक्षं वृक्षं परिसिञ्चति ॥ १८ ॥

संभावननिवृत्त्याशीरपेक्षासु समुच्चये ।
प्रश्नभूषणगर्हाभ्रंशेऽपिः प्रोक्तो मनीषिभिः ॥ १९ ॥

अपि । अयमुपसर्गः नवस्वर्थेषु वर्तते । **संभावने;** अपि सिञ्चेत् मूलसहस्रम् । **निवृत्तौ;** अपि मानसं जह्यात् । **आशिषि;** अपि वर्षशतं

जीव्यात् । **अपेक्षायाम्**; अपि विद्वान् । **समुच्चये**; अपि सिञ्चेः । **प्रश्ने**; अपि गच्छति । **भूषणे**; अपिनह्यति हारम् । **गर्हायाम्**; अपि स्तुयात् वृषलीपतिम् । **भ्रंशे**; अपि भ्रश्येत् वचने ॥ १९ ॥

दाक्षिण्यवीप्सामृतिदानपूजा-
तद्योगसामर्थ्यसमीप उक्तः ।
व्याप्तावुपाचार्यकृतौ च दोषा-
ख्याने तथारम्भविनिश्चये च ॥ २० ॥

उप । अयमुपसर्गः त्रयोदशसु प्रयोगेषु प्रयुज्यते । **दाक्षिण्ये**; उपचारः । **वीप्सायाम्**; देवं देवमुपयाचते । **मृतौ**; उपरतो देवदत्तः । **दाने**; उपहरत्यर्थं देवदत्ताय । **पूजायाम्**; उपासितो वह्निः । **तद्योगे**; उपपन्नं ध्यानमाह । **सामर्थ्ये**; उपकरोति देवदत्तः । **समीपे**; उपकुम्भम् । **व्याप्तौ**; उपकीर्णः पांसुभिः । **आचार्यकृतौ**; उपदिशति शिष्येभ्यः । **दोषाख्याने**; उपघातः । **आरम्भे**; उपक्रमते भोक्तुम् । **विनिश्चये**; उपपन्नमेतत् ॥ २० ॥

स्पर्धेच्छाप्तिषु बन्धने च निलये वाक्ये समीपग्रहेऽ-
प्यन्तर्भावनिवृत्तिविस्मयभयादानोर्ध्वकर्माशिषि ।
कृच्छ्रे साध्यनिमन्त्रणाभिविधिषु श्लेषाभिमुख्येऽपि चाङ्
निर्देशावधिविक्रियासु शकने स्थानादिकर्मण्यपि ॥ २१ ॥

आङ् । अयमुपसर्गः सप्तविंशत्यर्थेषु वर्तते । **स्पर्धायाम्**; मल्लो मल्लमाह्वयते । **इच्छायाम्**; आकाङ्क्षति । **आप्तौ**; आसादितमनेन । **बन्धने**; आमुञ्चति कवचम् । **निलये**; आवसथः । **वाक्ये**; आज्ञापयति । **समीपे**; आसन्नः । **ग्रहे**; आलम्बते । **अन्तर्भावे**; आपीतमुदकं सिकताभिः । **निवृत्तौ**;

आवृत्तः । आरमति । **विस्मये** ; आनन्दितः । **भये** ; आकम्पितः । **आदाने** ; आदत्ते धनम् । **ऊर्ध्वकर्मणि** ; आरोहति हस्तिनं हस्तिपकः । **आशिषि** ; आशास्ते । **कृच्छ्रे** ; आपदं गतः । **साध्ये** ; आचरति कपटेन । **निमन्त्रणे** ; आमन्त्रितः । **अभिविधौ** ; आकुमारं यशो रामभद्रस्य । **श्लेषे** ; आलिङ्गति । **आभिमुख्ये** ; आगच्छति देवदत्तः । **निर्देशे** ; आदिशति । **अवधौ** ; आका-न्यकुब्जं वृष्टो देवः । **विक्रियायाम्** ; . . . . । **शकने** ; आक्रमते गगनं चन्द्रमाः । **स्थाने** ; आस्पदम् । **आदिकर्मणि** ; आरभते विद्यामध्येतुम् ॥२१॥

इति लघुरुपसर्गवृत्तिः समाप्ता
